*जटाटवीगलज्जलप्रवाहपावितस्थले*
*गलेवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।*
*डमड्डमड्डमड्डमन्निनादवड्डमर्वयं*
*चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥ 1 ॥*

*जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-*
*-विलोलवीचिवल्लरीविराजमानमूर्धनि ।*
*धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके*
*किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥ 2 ॥*

*धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर*
*स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।*
*कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि*
*क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥ 3 ॥*

*जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा*
*कदम्बकुङ्कुमद्रवप्रलिप्तादिग्वधूमुखे ।*
*मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे*
*मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ 4 ॥*

*सहस्रलोचनप्रभृत्यशेषलेखशेखर*
*प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः ।*

भुजङ्गराजमालया निबद्धजाटजूटक
श्रियै चिराय जायतां चकोरबन्धुशेखरः || 5 ||

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
-निपीतपञ्चसायकं नमन्निलिम्पनायकम् |
सुधामयूखलेखया विराजमानशेखरं
महाकपालिसम्पदेशिरोजटालमस्तु नः || 6 ||

करालफालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनञ्जयाधरीकृतप्रचण्डपञ्चसायके |
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
-प्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम || 7 ||

नवीनमेघमण्डली निरुद्धदुर्धरस्फुरत्-
कुहूनिशीथिनीतमः प्रबन्धबन्धुकन्धरः |
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः || 8 ||

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-
-विलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् |
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे || 9 ||

अगर्वसर्वमङ्गलाकलाकदम्बमञ्जरी
रसप्रवाहमाधुरी विजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥ 10 ॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस-
-द्विनिर्गमत्क्रमस्फुरत्करालफालहव्यवाट् ।
धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवः शिवः ॥ 11 ॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्-
-गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृष्णारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥ 12 ॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललाटफाललग्नकः
शिवेति मन्त्रमुच्चरन् सदा सुखी भवाम्यहम् ॥ 13 ॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं

पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेतिसन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥ 14 ॥

पूजावसानसमये दशवक्त्रगीतं यः
शम्भुपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखिं प्रददाति शम्भुः ॥ 15 ॥